Click here to go back



॥ श्री महागणपतये नमः ॥
Indian Astrology Source
www.astrovidya.com

## अथ अंगारक स्तोत्रं

अथ ऋणग्रस्तस्य ऋणविमोचनार्थं अंगारक स्तोत्रं॥ स्कन्द उवाच॥ ऋणग्रस्त नराणां तु ऋणमुक्तिः कथं भवेत्॥ ब्रह्मोवाच॥ वक्ष्येहं सर्वलोकानां हितार्थं हितकामदः॥ ओं अस्य श्री अंगारकस्तोत्र महामंत्रस्य गौतम ऋषिः। अनुष्टुप्छंदः। अंगारको देवता मम ऋणविमोचनार्थे जपे विनियोगः॥ (ध्यानं) रक्तमाल्यांबरधरः शूलशक्ति गदाधरः। चतुर्भुजो मेषगतो वरदश्च धरासुतः॥ मंगळो भूमिपुत्रश्च ऋणहर्त धनप्रदः। लोहितो लोहिताक्षश्च सामगानां कृपाकरः॥ धरात्मजः कुजो भौमो भूमिदो भूमिनंदनः। अंगारको यमश्चैव सर्वरोगापहारकः॥ सृष्टिकर्ता च हर्ता च सर्वदेवैश्च पूजितः। एतानि कुजनामानि नित्यं यः प्रयतः पठेत्। ऋणं न जायते तस्य धनं प्राप्नोति न संशयः॥ अंगारक महीपुत्र भगवान्भक्तवत्सल। नमोस्तुते ममाशेष ऋणमाशु विनाशय॥ रक्तगंधैश्च पुष्पैश्च धूपदीपगुडोदनैः। मंगळं पूजयित्वातु मंगळेहनि सर्वदा॥ एकविंशति नामानि पठित्वातु तदंतिके। ऋणरेखा प्रकर्तव्या अंगारेण तदग्रतः॥ एवं प्रमार्जयेत्वश्चात् वामपादेन संस्पृर्श। अंगारक महीपुत्र भगवान्भक्तवत्सल॥ नमोस्तुते ममाशेष ऋणमाशु विमोचय। एवं कृतेन संदेहो ऋणंहित्वाधनीभवेत्॥ महतींश्रियमाप्नोति ह्यपरोधन दोयुवा। भूमिपुत्र महातेजाः स्वेदोद्भव पिनाकिनः॥ ऋणार्तस्त्वां प्रसन्नोस्मि गृहाणार्घ्यं नमोस्तुते॥ इति अंगारक स्तोत्रं॥

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back